ब्रह्मचारी ऐसे रहता है यदि स्नातक ऐसे न रहे तो अपयश होता है । ३१ । तीन प्रकार के स्नातक होते हैं । विद्या स्नातक, व्रतस्नातक, विद्या व्रतस्नातक । ३२ । वेद समाप्त करके व्रतसमाप्त न करके वर्त्ते वह विद्यास्नातक है । ३३ । व्रतसमाप्त कर वेद समाप्त न करके वर्त्ते वह व्रतस्नातक है ।३४। वेद और व्रत दोनों को समाप्त करे वह विद्याव्रत स्नातक है ।३५। ब्राह्मण का १६ वर्ष तक ऋनतीतकाल होता है । ३६ । क्षत्रिय का २२ वर्ष तक ।३७। वैश्य का २४ तक ।३८। इस के बाद सावित्री से पतित हो जाते हैं ।३९ । न इन्हें यज्ञोपवीत दे न वेद पढ़ावे न यज्ञ करावे न इन से व्यवहार करै । ४० । समय वीतने पर श्रौत सूत्र में नियत किये अनादिष्ट प्रायश्चित्त करे ।४१। जिन के ३ पीढ़ी तक सावित्री पतित हो जावें उन की सन्तान को न पढ़ावे । ४२ । वह यदि संस्कार चाहैं तो व्रात्यस्तोम इष्टि करैं तो भले ही पढ़ें व्यवहार योग्य होते हैं ऐसा वचन है ॥ ४३ ॥

कण्डिका ६ (समावर्त्तन संस्कार)

वेदꣳसमाप्य स्नायात् । १ । ब्रह्मचर्यं वाऽष्टाचत्वारि ꣳ शकम् । २ । द्वादशकेऽप्येके । ३ । गुरुणानुज्ञातः । ४ । विधिर्विधेयस्तर्कश्चवेदः । ५ । षडङ्गमेके । ६ । न कल्पमात्रे । ७ । कामन्तु यावज्जीवस्य । ८ । उपसंगृह्य गुरुꣳसमिधोऽभ्याधाय परिश्रितस्योत्तरतः कुशेषु प्रागग्रेषु पुरस्तात् स्थित्वाऽष्टानामुदकुम्भानाम्

। ९ । ये अप्स्वन्तरग्नय: प्रविष्टाग्नीहूयउपगेहूयो मयूखोमनोहाऽस्खलो विरुजस्तनूद्रप्सिरिन्द्रिय-हाअतितान्सृजामि । येरोचनस्तमिहगृह्णामि इत्येकस्मादपोगृहीत्वा । १० । तेनाभिषिञ्चने तेन 'मामाभिषिञ्चामि श्रियै यशसे ब्रह्मणे ब्रह्मवर्चसाय, इति । ११ । ' येन श्रियमकृणुतां येनावमृशताꣳसुराम् । येनाक्षयावभ्यषिञ्चतां यद्वां तदश्विना यशः' इति । १२ ।'आपोहिष्ठा , इति च प्रत्यृचम् । १३ । त्रिभिस्तूष्णीमितरैः । १४ । उदुत्तममितिमेखलामुन्मुच्य दण्डं निधाय वासोऽन्यत परिधायादित्यमुपतिष्ठते । १५ । उद्यन्भ्राजभृष्णुरिन्द्रो मरुद्भिरस्यात् प्रातर्यावभिरस्याद् दशसनिरसि दशसनिं मा कुर्वाविदन्मागमय ॥ उद्यन् भ्राजभृष्णुरिन्द्रो मरुद्भिरस्याद् दिवायावभिरस्याच्छतसनिरसि शतसनिं मा कुर्वाविदन्मागमय । उद्यन् भ्राजभृष्णुरिन्द्रो मरुद्भिरस्यात् सायंयवभिरस्यात् सहस्रसनिरसि सहस्रसनिं मा कुर्वाविदन्मा गमय , इति । । १६ । दधि तिलान्वा प्राश्य जटालोभनखानि सꣳहृत्यौदुम्बरेण दन्तान् धावेत्प्रक्षाल्य

दग्धदध्वꣳसोमोराजायमागमत् । स मे मुखं प्रमार्क्ष्यते यशसा च भगेन च, इति । १७ । उत्थाद्य पुनः स्नात्वाऽनुलेपनं नासिक्ययोर्मुखस्य वोपगृह्णीते 'प्राणापानौ मे तर्पय, चक्षुर्मे तर्पय, श्रोत्रं मे तर्पय, इति । १८ । 'पितरः शुन्धध्वम्, इति पाणयो रवनेजनं दक्षिणा निषिच्यानुलिप्यजपेत् 'सुचक्षा अहमक्षोभ्यां भूयासꣳसुवर्चा मुखेन । सुश्रुत् कर्णाभ्यां भूयासम्, इति । १९ । अहतं वासो धौतं वाऽमैत्रेणाच्छादयीत 'परिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि । शतं च जीवामि शरदः पुरूचीरायस्पोषमभि संव्ययिष्ये, इति । २० । अथोत्तरीयम् ' यशसा मा द्यावापृथिवी यशसेन्द्रा बृहस्पती यशो भगश्च मा विदद्दु यशो मा प्रतिपद्यताम् ' इति । २१ । एकं चेत् पूर्वस्योत्तरवर्णेन प्रच्छादयीत । २२ । सुमनसः प्रतिगृह्णाति 'या आहरज्जमदग्निः श्रद्धायै मेधायै कामायेन्द्रियायाताअहंप्रतिगृह्णामियशसाचभगेनच' इति।२३। अथावबध्नीते' यद्दु यशोऽप्सरसामिन्द्रश्चकार

त्रिपुलं पृथु। तेन संग्रथिताः सुमनस आबध्नामि यशो मयि' इति । २४ । उष्णीषेण शिरो वेष्टयते ' युवा सुवासाः ' इति । २५ । ' अलंकरणमसि, भूयाऽलंकरणं भूयात् इति कर्णवेष्टकौ । २६ । ' वृत्रस्य ' इत्यङ्क्ते आंक्षणौ । २७ । रोचिष्णुरसि' इत्यात्मानमादर्शे प्रेक्षते ।२८। छत्रं प्रतिगृह्णाति बृहस्पते श्छदिरसि पाप्मनो मा मन्तर्धेहि' तेजसोयशसो माऽन्तर्धेहि' इति।२९। 'प्रतिष्ठे स्थो विश्वतो मा पातम्,इत्युपानहौ प्रतिमुञ्चते । ३० । ' विश्वाभ्यो मानाष्ट्राभ्यस्परिपाहि सर्वतः' इति वैणवं दण्डमादत्ते । ३१ । दन्तप्रक्षालनादीनि नित्यमपि वास श्छत्रोपानहश्चापूर्वाणि चेन्मन्त्रः ॥ ३२ ॥

वेद समाप्त करके स्नान करै (इसी लिये स्नातक कहते हैं) । १ । या ४८ वर्ष तक पढ़ के ही स्नातक हो । २ । कोई १२ वर्ष के पीछे ही स्नातक बनाते हैं । ३ । गुरु की आज्ञा पाकर ही ।४। विधि विधेय वेद हैं ।५। कोई ६ः अङ्गों को वेद कहते हैं । ६ । कल्पमात्र को नहीं । ७ ॥

जब यज्ञ के कर्म कराने वाले को इच्छा होतब ही स्नातक हो । ८ । (विधिः) आचार्य के चरण स्पर्श कर, अग्नि में समिधा छोड़कर अग्नि से उत्तर की ओर अग्र भाग बिछाई कुशों पर ८ घड़े, जल के भरे हुवों से । ९ ।

" ये अप्सु० " इस मन्त्र से एक घड़े का जल लेकर । १० । उस से अभिषेक करै । तेनाभि० इस मन्त्र से ।११। फिर येन श्रियमकृणु० इस से । १२ । फिर आपोहिष्टा० इन ३ मन्त्रों से ३ । ४ । ५ वें घड़े से । १३ । शेष ६ । ७ । ८ वें इन तीन घड़ो से चुप चाप अभिषेक करै । १४ । " उदुत्तमम्० " मन्त्र से पगड़ी छोड़ दे । दण्ड को धर कर अन्य वस्त्र पहिन कर सूर्य के सामने खड़ा होता है । १५ । " उद्यन् भ्राजि० " इत्यादि मन्त्र पढ़ता है । १६ । दही वा तिल खाकर जटा लोम नखों को कटाकर गूलर की दतौन से दान्त शुद्ध करै । "अन्नाद्याय०" ऐसे मन्त्र पढ़े ।१७ उबटन मलकर फिर स्नान करै "प्राणापानौ मे० " उस मन्त्र से मुखनासा पर जन्दन लगावे ॥१८॥ "पितरः शुन्धध्वम्" कहकर दक्षिण को मुखकर दोनों हाथों से जल देकर चन्दन लगाता हुवा "शुचता०" ऐसे जप करै । १९ । नवीन वस्त्र वा धुले वस्त्र धोती " परिधास्ये० " इस मन्त्र से पहिने । २० । " यशसामा० " इस मन्त्र से दुपट्टा ओढ़े । २१ । यदि १ ही धोती हो तो पहिले मन्त्र से आधी बांधले उत्तर मन्त्र से आधी ओढ़लेवे । २२ । " या आहर ज्जमदग्निः० " इस मन्त्र से आचार्य से पुष्प माला लेवे ।२३। " यज्ञयज्ञो० " इस मन्त्र में गले में पहिने । २४ । पगड़ी से शिर को लपेटता है " युवासु० " इस मन्त्र से । २५ । "अलं करणमसि " इस मन्त्र से कान लपेटे । २६ । " चक्षुस्य० " आंखों में अञ्जन डाले । २७ । " रोचिष्णुरसि० " इस मन्त्र से दर्पण देखे । २८ । छत्र लेता है " बृहस्पते० " इस मन्त्र से । २९ । "प्रतिष्ठेस्थो०" मन्त्र में जूता पहिने ।३०। "विश्वाभ्यो० मन्त्र से बांस का दण्ड ले ता है । ३१ । दन्तधावनादि वस्त्र छाता जूता जब २ नवीन पहिने तब २ मन्त्र पढ़े ॥ ३२ ॥

कण्डिका ७ (स्नातक के लिये यम) ।

स्नातस्य यमान् वक्ष्यामः । १ । कामादितरः ॥ २ ॥ नृत्यगीतवादित्राणि न कुर्यान्न च गच्छेत् ॥ ३ ॥ कामं तु 'गीतं गायति वैव गीते वा रमते, इति श्रुतेर्ह्यपरम् । ४ । क्षेमे सक्तं ग्रामान्तरं न गच्छेन्न च धावेत् । ५ । उदपानावेक्षण वृक्षारोहण फलप्रपतन सन्धिसर्पण विषमस्नान विषमलङ्घन शुष्कवदन सन्ध्यादित्यप्रेक्षण भैक्षणानि न कुर्यात् 'न ह वै स्नात्वा भिक्षेतापह वै स्नात्वा भिक्षां जयति इति श्रुतेः । ६ । वर्षत्यप्रावृतो व्रजेत् 'अयं मे वज्रः 'पाप्मानमपहनत्' इति । ७ । अस्वात्मानं नावेक्षेत । ८ । अजातलोम्नीं विपुथ्सीथ्षण्डञ्च नोपहसेत् । ९ । गर्भिणी विजनन्येति ब्रूयात् । १०। सकुलमिति नकुलम् ॥ ११ ॥ मगालमिति कपालम् ॥ १२ ॥ मणिधनुरितीन्द्रधनुः ॥ १३ ॥ गां धयन्तीं परस्मै नाचक्षीत ॥ १४ ॥ उर्वरायामनन्तर्हितायां भूमावुत्सर्पंस्तिष्ठन्न मूत्र पुरीषे कुर्यात् ॥ १५ ॥ स्वयं विशीर्णेन काष्ठेन प्रमृजीत ॥१६॥ विकृतं वासो नाच्छा-

दर्यात ॥ १७ ॥ दृढव्रतो वधत्रः स्यात् सर्वत आत्मनं गोपायेत् सर्वेषां मित्र मिव ॥१८॥ ७ ॥

कण्डिका ७

अर्थ—स्नातक के यम कहते हैं। १। इन यमो को अन्य पुरुष भी चाहे तो पालन करे। २। नाचना, गाना, बजाना न स्वयं करे न इन कार्यों में जावे। ३। "गीतं गायति० " "गीत गाता है वा गीत से प्रसन्न होता है" यह श्रुति है इस से सामवेद गानामात्र चाहे तो दोष नहीं। ४। विना आपत्ति समय के रात में दूसरे ग्राम में न जावे न दौड़े। ५। कूप झांकना वृक्षों पर चढ़ना फल झाड़ना नख चटकाना, नग्न-स्नानकर्ता नीचे में कूदना कठोर भाषण, उदय अस्त होते सूर्य का देखना और भिक्षा मांगना यह कर्म न करे। "नह-वै० शतपथ १०। ३। ३। ७ भिक्षा वर्जित है। ६। वर्षा में भी छत्र न लगावे। अयं मैं मन्त्र पढ़ता हुवा। ७। पानी में मुख न देखे। ८। जब तक रोम न आये हों ऐसी बाला स्त्री और नपुंसक से उपहास=हंसी न करे (विवाह न करे. यह तात्पर्य है।)। ९। गर्भिणी स्त्री को विजन्या कह कर बोले। १०। नीले को नकुल न कह सकुल कहे।११। कपाल को भगाल। १२। इन्द्र धनु को मघि धनुष कहे।१२। बछड़े को चुंखाती गौ को किसी को न बतावे। १४। जमे हुवे या बुये हुवे खेत में या चलते २ या खड़े २ विप्र मूत्र न करे। १५। स्वयं गिरी हुई लकड़ी से गुद को पोछे (फिर सही जल मे शुद्ध करे)। १६। जिगड़ा (विकृत) वस्त्र न ओढ़े। १७। दृढ़ प्रतिज्ञ रक्षक सब का मित्र हो ॥ १८ ॥

कण्डिका ८ (स्नातक के व्रत) प्रक्षिप्त

तिस्रो रात्रीर्व्रतं चरेत् । १ । * अमाँसाश्यमृण्मयपायी । २ । स्त्रीशूद्रशवकृष्णशकुनिशुनांचादर्शनमसम्भाषा च तैः । ३ । शवशूद्रसूतकान्नानि च नाद्यात् । ४ । मूत्रपुरीषष्ठीवनं चातपे न कुर्यात् सूर्याच्चात्मानं नान्तर्दधीत । ५ । तप्रेनोदकार्थान् कुर्वीत । ६ । अवज्योत्य रात्रौ भोजनम् । ७ । सत्यवदनमेव वा । ८ । दीक्षितोप्यातपादीनि कुर्यात् प्रवर्ग्यवांश्चेत् । ९ ॥

कण्डिका ८

समावर्त्तन से तीन रात्तक व्रतकरै । मांस न खावे और मट्टी के पात्र में पानी न पीवे । स्त्री, शूद्र, शव, काले पक्षी, कुत्ता इनको न देखे न इन से बोले । ३ । शव शूद्र और सूतक का अन्न न खावे । ४ । धूप में मूत्र विष्टा थूकना न करै छत्री

यह समस्त कण्डिका ही प्रक्षिप्त प्रतीत होती है । जब कं० ७ में स्नातक के नियम कह चुके थे तब उसी में यह सूत्र भी धर देते । मांस का मांस=बढ़द अर्थ भी कर दिया तो क्या मट्टी के पात्र में भोजन क्यों न करै । गर्म जल से स्नानादि सभी क्रिया अंड बण्ड हैं । यमो के वर्णन में पहले ही " यमान् वक्ष्यामः " ऐसी प्रतिज्ञा है आगे पीछे सभी कण्डिकाओं के आरम्भ में प्रतिज्ञा हैं इस कं० में कोई प्रतिज्ञा भी नहीं है ॥

धूपमें भी न लगावे । ५ । गरम जल से स्नान संन्धादि करै । ६ । रात्रि को दीपक जलाकर भोजन करै । ७ । अथवा सब नियमों के बदले सत्य भाषण ही करै । ८ । दीक्षित समर्थ हो तौ उक्त नियम करै ॥ ९ ॥

कण्डिका ९

अथातः पञ्च महायज्ञाः । १ । वैश्वदेवाद-न्नात् पर्युक्ष्य स्वाहाकारैर्जुहुयाद् ब्रह्मणे प्रजा-पतये गृह्याभ्यः । कश्यपायानुमतय इति । २ । भूतगृह्येभ्यो मणिके त्रीन् पर्जन्यायाद्भ्यः पृथि-व्यै । ३ । धात्रे विधात्रे च द्वार्ययोः । ४ । प्रति दिशां वायवे दिशां च । ५ । मध्ये त्रीन् ब्रह्म-णोऽन्तरिक्षाय सूर्याय । ६ । विश्वेभ्यो देवेभ्यो विश्वेभ्यश्च भूतेभ्यस्तेषामुत्तरतः । ७ । उषसे भूतानां च पतये परम् । ८ । पितृभ्यः स्वधा नम इति दक्षिणतः । ९ । पात्रं निर्णिज्योत्तरा परस्यां दिशि निनयेत् 'यक्ष्मैतत्ते, इति । १० । उद्धृत्याग्रं ब्राह्मणायावनेज्य दद्यात् 'हन्तते, इति । ११ । यथार्हमभिक्षकानतिथींश्च सम्भ-जेरन् । १२ । बालज्येष्ठा गृह्या यथार्हमश्नीयुः । १३ । पश्चात् गृहपतिः पत्नी च । १४ । पूर्वो वा

गृहपतिः तस्मादुस्वादिष्टं गृहपतिः पूर्वोऽतिथिभ्योऽश्नीयाद्, इति श्रुतेः । १५ । अहरहः स्वाहाकुर्यादन्नाभावे केनचिदाकाष्ठाद् देवेभ्यः पितृभ्यो मनुष्येभ्य श्रोदपात्रात् । १६ ॥९॥

कण्डिका ९

अब आगे पञ्चयज्ञ हैं । १ । वैश्वदेव के अन्न से पर्युक्षण कर स्वाहा शब्द लगाकर ब्रह्मणे, प्रजापतये, गृह्याभ्यः, कश्यपाय, अनुमतये, इन का होम करै ।२। पर्जन्यायनमः, अद्भ्यो नमः पृथिव्यैनमः ऐसे ३ बलि देवे । ३ धात्रे, विधात्रे, और द्वार्यथोः नमः कह बलि दे । ४ । पूर्वादि दिशाओं में दिशाओं को वायवे स्वाहा कह कर बलि धरे । ५ । मध्यमे ३ बलि ब्रह्मणे स्वा० । अन्तरिक्षाय स्वाहा सूर्यायच स्वा० ।६ । उत्तर में विश्वेभ्यो देवेभ्यः स्वाहा० विश्वेभ्यो भूतेभ्यः । ७ । उस से आगे उषसे० और भूतानाम् पतये स्वाहा नमः । ८ । पितृभ्यः स्वधानमः ऐसे कह कर दक्षिण में । । ९ । पात्र को धोकर उत्तर की ओर उंधादे " यद्मैतत्ते " यह कहै । १० । इन्तते कहकर ब्राह्मण के आगे भोजन देवे । ११ । यथायोग्य भिक्षुकों को अतिथियों को भी देवे ।१२। घर के बालक बड़े सब यथायोग्य भोजन करैं । १३। फिर गृहपति और उसकी पत्नी भी भोजन करैं ।१४। या पहले गृहपति खावे पीछे पत्नी खावे। क्योंकि अतिथि पूर्व जिमाकर पहिले गृहपति खावे यह श्रुत है ।१५। नित्य २ होम करे । अन्न न होतो किसी समिधा से ही देवों मनुष्यों पितरों को जल के पात्र से प्रसन्न करै १६

कण्डिका १० (अध्ययनारम्भ) ।

अथातोऽध्यायोपाकर्म । १ । ओषधीनां प्रादुर्भावे श्रवणेन श्रावण्यां पौर्णमास्याꣳश्रावणस्य पञ्चमीꣳहस्तेन वा । २ । आज्यभागावित्वाऽऽज्याहुतीर्जुहोति । ३ । 'पृथिव्या अग्नये, इत्यृग्वेदे । ४ । अन्तरिक्षाय वायवे, इति यजुर्वेदे । ५ । 'दिवे सूर्याय, इति सामवेदे । ६ । 'दिग्भ्यश्चन्द्रमसे, इत्यथर्ववेदे । ७ । 'ब्रह्मणे छन्दोभ्यश्च, इति सर्वत्र । ८ । प्रजापतये देवेभ्य ऋषिभ्यः श्रद्धायै मेधायै सदस्पतयेऽनुमतये इति च । ९ । एतदेवव्रतादेशन विसर्गेषु । १० । सदस्पतिम्, इत्यक्षतधानास्त्रिः ।११। सर्वेऽनुपठेयुः । १२ । हुत्वाहुत्वौदुम्बर्यस्तिस्रस्तिस्रः समिध आदध्युरार्द्रा सपलाशा घृताक्ताः सावित्र्या । १३ । ब्रह्मचारिणश्चपूर्वकल्पेन । १४ । शन्नो भवन्तु, इत्यक्षतधाना अखादन्तः ,प्राश्नीयुः । १५ । , दधिक्राव्णे, इति भक्षयेयुः । १६ । स यावन्तं गणमिच्छेत तावंतस्तिलानःकर्षफलके जुहुयात् सावित्र्या ' शुक्र ज्योतिः , इत्यनुवाकेनवा । १७ । प्राशनान्ते प्रत्यङ्मुखे-

भ्य उपविष्टेभ्य ओंकारमुक्त्वा त्रिश्चसावित्रिम-
ध्यायादीन् प्रब्रूयात् । १८ । ऋषिमुखानि बह्व-
चानाम् ।१९। पवीणि छन्दोगानाम् ।२०। सूक्तान्य-
थर्वणाम् ।२१। सर्वे जपन्ति 'सहनोऽस्तु सहनो-
ऽवतु सह न इदं वीर्यवदस्तुत्रह्म । इन्द्रस्तद्वेद येन
यथा नविद्विषामहे, इति । २२ । त्रिरात्रं नाधी-
योरन् । २३ । लोमनखानामनिकृन्तनम् । २४ ।
एके प्रागुत्सर्गात् । २५ ।

कण्डिका १०

अब पढ़ने का कर्म कहते हैं ।१। ओषधियों के उगने पर श्रवण नक्षत्र युक्त श्रावणी पूर्णिमा को वा श्रावण की पञ्चमी हस्त नक्षत्र से युक्तहो ।२। आज्यभागाहुति करके आज्याहुति देता है । ३ । पृथिव्यै स्वा० अग्नये स्वाहा यह ऋग्वेद पाठ में । ४ । अन्तरिक्षायस्वाहा वायवे स्वाहा यह यजुर्वेद पढ़ने में ।५। दिवेस्वा० सूर्यायस्वा० यह सामवेद में ।६। 'दग्भ्यःस्वा०चन्द्र-मसे स्वाहा ऐसा अथर्व वेद में ।७। ब्रह्मणे स्वा० और छन्दोभ्यः स्वाहा यह सब वेदों में ।८। प्रजापतये । देवेभ्यः । ऋषिभ्यः। श्रद्धायै, मेधायै, सदसस्पतये, अनुमतये (स्वाहा लगाकर) ।९। ऐसे ही यज्ञोपवीत और सब कर्मों में करै । १० । सद सस्पति० (य० ३२ । १३) मन्त्र से चावलों की खील से आचार्य ३ आहुति देवे । ११ । मन्त्र सब शिष्य साथ पढ़ें । २२ । होम कर करके गूलर की ३ । ३ समिधा पत्तों सहित

गीली घृत में भिगो कर गायत्री पढ़कर लेवें । १३ । आचार्य के साथ २ ब्रह्मचारी भी होमें । १४ ।

कण्डिका ११ (अनध्याय प्रकरण) ।

वातेऽमावास्यायाश्च सर्वानध्यायः । १ । श्राद्धाशनेचोल्काऽवस्फूर्जद्भूमिचलनाग्न्युत्पातेष्वृतुसन्धिषुचा कालात् । २ । उत्सृष्टेष्वभ्रदर्शनेसर्वरूपे चत्रिरात्रं त्रिसन्ध्यं वा । ३ । भुक्त्वाऽऽर्द्रपाणिरुदाके निशायाश्च सन्धिवेलयोरन्तः शवेग्रामेऽन्तर्दिवाकीर्त्ये । ४ । धावतोऽभिशस्तपतितदर्शनाश्चार्याभ्युदयेषु च तत्कालम् । ५ । नीहारे वादित्रशब्द आर्तस्वने ग्रामान्ते श्मशाने श्वगर्दभोलूकशृगालसामशब्देषु शिष्टाचरिते च तत्कालम् । ६ । गुरौप्रेतेऽपोऽभ्यवेयाद्, दशरात्रं चोपरमेत् । ७ । सतानूनत्रिणि सब्रह्मचारिणिच त्रिरात्रम् । ८ । एकरात्रमसब्रह्मचारिणि । ९ । अर्द्धषष्ठान् मासानधीत्योत्सृजेयुः । १० । अर्द्धसप्तमान्वा । ११ । अथेमामृचं जपन्ति 'उभा कवी युवा यो नो धर्मः परापतत् । परिसख्यस्य धर्मणो विसख्यानि विसृजामहै, इति । १२ । त्रिरात्रञ्च सहोष्य विप्रतिष्ठेरन् । १३ ।

कण्डिका ११

अतिवायु चलते दिन और सब अमावसों को छुट्टी है । १ ।

श्राद्ध भोजन * उल्कापात बादल गर्जने पर भूमि कंप अग्नि पड़ौस में लगने पर ऋतु परिवर्त्तन के दिन १ । १ दिन छुट्टी हों । २ । वेद समाप्ति और जब समस्त दिन मेघदर्शन न हो तीन रात या ३ सन्ध्या का अनध्याय हो ।३। भोजन के पीछे यावत् भीगे हाथ रहें । जल में नौका पर बैठे रात में, सायं प्रातः सन्ध्या के समय, ग्राम में मुर्दा पड़ा हो ॥ या दिवा कीर्त्ति=कोई चाण्डाल पास हो तब तक वेद न पढ़े । छुट्टी है । दौड़ते पाखण्डी, पतित के देखते हुवे । आश्चर्य देखने के समय (उसी समय तक) वेद न पढ़े ।५। कुहरा, वर्षते बाजा बजते, हा हा कार में, सिवाने पर श्मशान में, कुत्ते गधे उल्लू गीदड़ बोलते में, सामवेद के, गाते समय और किसी सज्जन के आने पर उस समय न पढ़े । ६ । गुरु के मरने पर जल में स्नान करे और १० दिन तक पठनबन्द करे । ७ । सोमयाजी ऋत्विज के और ब्रह्मचारी सहाध्यायी के मरने पर ३ दिन । ८ । अ ब्रह्मचारी सहाध्यायी की मृत्यु पर १ दिनअनध्याय करे ।९। साढ़े छः मास पढ़कर छुट्टी करे (वेद की) १० या ७॥ मास । ११ । फिर गुरु शिष्य साथ इस ऋचा को जपें " उभाकर्वा० " । १२ । तीन रात गुरुकुल में छुट्टी मनाकर अलग हो जावे । १३ ।

कण्डिका १२ (उत्सर्ग कर्म)

पौषस्य रोहिण्यां मध्यमायां वाऽष्टकाया-मध्यायानुत्सृजेत् । १ । उदकान्तं गत्वाद्भि र्दैवांश्छन्दाꣳसि वेदानृषीन्पुराणाचार्यान्संवत्सरं

* जिस दिन बहुत श्रद्धा से प्रीति भोजादि हुवा हो उस उस दिन अधिक खाया जाता है ॥

च सावयव पितृनाचार्यान् स्वांश्चतर्पयेयुः ।२। सावित्रीं चतुरनुद्रुत्य विरताः स्म'इति ब्रूयुः ।३। क्षपणं प्रलघनं च पूर्ववत् । ४ ।

कण्डिका १२

पौष के रोहिणी नक्षत्र में या सावन या अष्टमी को पढ़ना छोड़ दे । १ । जलाशय पर जा के जल से देवतों छन्दों, वेदों, ऋषियों, पुराणाचार्यों, गन्धर्वों ,अन्यआचार्यों संवत्सर को और महीनों को । पितरो=ऋतुओं को अपने आचार्यों को भी तृप्त करैं । २ । गायत्री चार वार पढ़ कर "विरताः स्म" ऐसे कहै । दूसरे आकर पूर्व के समान फिर पढ़े तब अनध्याय करे । ४ ।

कण्डिका १३ (प्रथम हल योजन)

पुण्याहे लाङ्गलयोजनं ज्येष्ठया वेन्द्रदैवत्यम् । १ । इन्द्रं पर्जन्यमश्विनौ मरुत उदलाकाश्यपꣳस्वातिकारीꣳसीतानुमतिं दध्ना तण्डुलैर्गन्धैरक्षतैरिष्ट्वाऽनड्वाहो मधुघृते प्राशयेत् । २ । 'सीरायुञ्जन्ति, इति योजयेत् ।३। 'शुनꣳसुफालाः, इति कृषेत्फालं वाऽऽलभेत ।४। नवाग्न्युपदेशाद्वपनानुषङ्गाच्च ।५। अग्र्यमभिषिच्याकृष्टं तदाकृष्य: ।६। स्थालीपाकस्य पूर्ववद्देवता यजेदुभयोर्व्रीहियवयोः प्रवपन्त्सीतायज्ञे च ।७। ततो ब्राह्मणभोजनम् । ८ ॥

कण्डिका १३

पवित्र दिन हल जोते । इन्द्र देवता के ज्येष्ठा नक्षत्र में । १ । इन्द्र, पर्जन्य, अश्विनी दोनों मरुत् उदल काश्यप, स्वातिकारी सीता और अनुमति को दही चावल सुगन्धौषधि से आहुति देकर अनुड्वह बैल को घृत मीठा चटावे । २ । सीरा युंजन्ति० य० १२ । ६७ मन्त्र पढ़कर हल जोड़े । ३ । शुनं सुफालाः य० १२ । ६९ इस से फाली को ठीक करे या जोते । ४ । या अग्नि में आहुति देते समय ही इन मन्त्रों को पढ़े हल जोड़ते जाते समय न पढ़े । ५ । बिना जुते खेत में हल जोते और उत्तम बैलको उस दिन पहिले पानी से साफ़ करले । ६ । जब २ धान जौ आदि बोने हों तभी पूर्व कहे देवों को स्थाली पाक से होम करे । और सीता यज्ञ में भी । ७ । फिर ब्राह्मण जिमावे । ८ ॥ १३ ॥

कण्डिका १४ (श्रवणा कर्म) ।

अथातः श्रवणा कर्म ।१। श्रावण्यां पौर्णमास्याम् ।२। स्थालीपाकꣳश्रपयित्वाऽक्षतधानाश्चैककपालं पुरोडाशं धानानां सूयसोः पिष्ट्वाऽऽज्यभागावृष्टाऽऽज्याहुतीर्जुहोति ।३। अपश्येतपदा जहि पूर्वेण चापरेण च सरत-चवारुणीरिमाः प्रजाःसर्वाश्चराजबान्धवैःस्वाहा ।४। नवै श्वेतस्याधाचारेऽहिदर्शं कञ्चन । श्वेताय वैदथ्याय नमः स्वाहा इति ।५। स्थालीपाकस्य जुहोति विष्णवे, श्रवणाय, श्रावण्यै पौर्णमास्यै, वर्षाभ्यश्चेति ।६।

धानावन्तमिति धानानाम्।७।धृता क्तान् सक्तून् सर्पेभ्यो जुहोति ।८। आग्नेय पाण्डुपार्थिवानाꣳ सर्पाणामधि पतये स्वाहा, श्वेतवायवान्तरिक्षाणाꣳसर्पाणामधिपतयेस्वाहा, इति।९। सर्वहुत मेक कपालं'ध्रुवाय भौमाय स्वाहा' इति ।१०। प्राश्नान्ते सक्तूनामेकदेशꣳ शूर्पेन्युप्योपनिष्क्रम्य बहिः शालायाः स्थण्डिलमुपलिप्योल्कायां म्रियमाणायां'माऽन्तरागमत'इत्युक्त्वा वाग्यतः सर्पानवनेजयति । ११ । आग्नेय पाण्डुपार्थिवानाꣳ सर्पाणामधिपतयेऽवनेनिक्ष्व, श्वेत वायवान्तरिक्षाणाꣳ सर्पाणामधिपतेऽवनेनिक्ष्व, अभिभूः सौर्यदिव्यानाꣳ सर्पाणामधिपतेऽवनेनिक्ष्व'इति ।१२। यथाऽवनिक्तं दर्व्योवघातꣳसक्तूनुत्सर्पेभ्यो बलिꣳ हरति । १३ । आग्नेय पाण्डुपार्थिवानाꣳ सर्पाणामधिपते एषते बलिः, श्वेतवायवान्तरिक्षाणा सर्पाणामधिपत एषते बलिः, अभिभूः सौर्यदिव्यानाꣳ सर्पाणामतिपत एषते बलिः' इति । १४ । अवनेज्य पूर्ववत् कङ्कतैः प्रलिखति । १५ । आग्नेयपांडुपार्थिवाना ँ सर्पाणामधिपते प्रलिखस्व श्वेतवायवान्तरिक्षाणा ँ सर्पाणामधिपते प्रलिखस्व, अभिभूः सौर्यदिव्या ँ सर्पाणामधिपते प्रलिखस्व' इति ।१६। अङ्गानानुलेपन ँ स्रजश्चाङ्गुस्वानुलिम्पस्व स्रजोऽपिनह्यस्व, इति ।१७। सक्तुशेष ँ स्थण्डिले न्युप्योदपात्रेणोपनिनीयोपतिष्ठते 'नमोऽस्तु सर्पेभ्यः, इति तिसृभिः । १८ । स यावत् कामयेत ' न सर्पा अभ्युपेयुरिति. तावत् सन्ततयोदधारया निवेशनं त्रिः परिषिञ्चन्परीयात् ' अपश्वेत पदा जहीति ' द्वाभ्याम् । १९ । दर्वीशूर्पे प्रक्षाल्य प्रतप्य प्रयच्छति । २० । द्वारदेशे

मार्जयन्तः 'आपोहिष्ठा, इति तिसृभिः ।२१। अनुगुप्तमेत सक्तुशेषं निधाय ततोऽस्तमितेऽस्तमिते ऽग्निं परिचर्य दर्व्यां पघात ँ सक्तून् सर्पेभ्यो बलिं हरेदाग्रहायण्या ।२२। तं ँ हरन्तं नान्तरेण गच्छेयुः । २३ । दर्व्याचमनं प्रक्षाल्य निद-धाति ।२४। धानाः प्राश्नन्त्यश्व ँ स्यूताः ।२५ । ततो ब्राह्मण भोजनम् । २६ । १४ ॥

कण्डिका १४ का भाषार्थ

अब आगे श्रवणा कर्म है ।१। श्रावणी पौर्णिमा में ।२। स्थालीपाक पकाकर सत्तूरे जौ की खील कुछ सत्तू जौ के और पुरोडाश बनावे, दो आज्य भाग होमे । आज्याहुति देता है । ३ । अपश्वेतपदा० । ४ । नवैश्वेतस्या० । ५ । इन से आहुति देकर स्थालीपाक से होमे । विष्णवे, श्रवणाय, श्रावणयै, पौर्णमास्यै, वर्षाभ्यः इत्यादि स्वाहान्त आहुति दे । ६ । धानावन्तम् (य० २० । २९) से खीलों को होमे घी मिलाकर सत्तुओं से सर्पों के लिये होम करे । ८ । अग्नेय० आदि मन्त्रों से आहुति दे । ९ । ध्रुवाय भौमाय स्वाहा कह कर कपाल में बनाये पुरोडाश को समस्त १ आहुति देवे । १० । संस्रव प्राशन कर कुछेक सत्तू लाज में धर बाहर आकर । शाला के बाहर चौंतरी=स्थंडिल को लीप कर जलती लकड़ी धर कर " माऽन्तरा गमत " ऐसे कह चुप हो सर्पों का जल देता है । इत्यादि कृत्य प्रक्षिप्त प्रतीत होता है । अतः भाषार्थ नहीं किया ॥

कण्डिका १५ (इन्द्रयज्ञ)

प्रौष्ठपद्यामिन्द्रयज्ञः । १ । पायसमैन्द्रꣳ

श्रपयित्वा ऽपूपांश्चरूपैः स्तीर्त्वाऽऽज्यभागान्वि-
ष्ट्वाऽऽज्याहुतीर्जुहोतीन्द्राग्नेन्द्राया अजायैकपदे-
ऽहिर्बुध्न्याय प्रौष्ठपदाभ्यश्चेति ।२। प्राश्ना नान्ते
मरुद्भ्योबलिंहरति 'अहुतादो मरुतः, इति श्रुतेः
।३। आश्वत्थेषु पलाशेषु 'मरुतो ऽश्वत्थे तस्थुः,
इति वचनात् ।४। 'शुक्रज्योतिः इति प्रतिमन्त्रम्
।५। विमुखेन च ।६। मनसा।७।'नामान्येषामेतानि,
इति श्रुतेः । ८ । इन्द्र देवीः, इति जपति । ९ ।
ततो ब्राह्मण भोजनम् । १०।१५ ॥

१५ कण्डिका

भादों की पूर्णिमा को इन्द्रयज्ञ होता है । १ । इन्द्र को खीर और पूड़े पकाकर ४ पूड़े अग्नि के चारों ओर धरे । आज्यभाग २ आहुति दे । इन्द्राय, इन्द्राग्नये, अजाय, एक पदे, अहिर्बुध्न्याय, प्रौष्ठपदाभ्यः, स्वाहान्त कह आहुति दे ।२। प्राशन के पीछे मरुतों को बलि देता है । अहुत खाने वाले मरुत हैं यह श्रुति है । पीपल के पत्तों पर बलि दे । मरुत (हवा) पीपल पर रहता है ।४। शुक्र ज्योति इत्यादि मन्त्रों से आहुति दे । ५ । तथा विमुख से भी । ६ । मन से मन्त्र पढ़कर । ७ । यह मरुत के नाम हैं यह श्रुति है । ८। "इन्द्र देवीः" इस मन्त्र को जपता है ९। फिर ब्राह्मण भोजन करावे १०

कण्डिका १६ (पृषातक कर्म)

आश्वयुज्यां पृषातकाः । १ । पाशमैन्द्र ७

अपयित्वा दधिमधुघृतमिश्रं जुहोतीन्द्राय इन्द्राण्या अश्विभ्यामाश्वयुज्यै पौर्णमास्यै शरदे चेति । २ । प्राशनान्ते दधिपृषात क्रमजुहोति ' ऊनं मे पूर्यतां पूर्णं मे मोव्यगात् स्वाहा इति । ३ । दधिमधुघृतमिश्रममात्या अवेक्षन्त ' आयात्विन्द्रः , इत्यनुवाकेन । ४ । मातृभिर्वत्सान्त्सꣳसृज्यताꣳ रात्रिमाग्रहायणीं च । ५ । ततो ब्राह्मणभोजनम् । ६ । १६ ॥

१६ कण्डिका

आश्विन की पूर्णिमा का पृषांतक यज्ञ है । १ । इन्द्र को खीर पकाकर दही शहद घी मिलाकर होमता है इन्द्राय इन्द्राण्यै, अश्विभ्यां, आश्वयुज्यै, पौर्णमास्यै और शरदे, स्वाहा कह होमे ।२। प्राशनान्त में पृषाकत को दोनों हाथों से होमे । ऊनं मे० इस मन्त्र से । ३ । दही मधु घृत खीर में मिलाकर मित्रजन देखें । "आयात्विन्द्रः" (य० २० । २७) इस अनुवाक से होम करे । ४ । उस अश्वौज की रात में माताओं (गौओं) से बछड़े मिलावे ।५। फिर ब्रह्मभोज करे ६

कण्डिका १७ (सीतायज्ञ)

अथ सीतायज्ञः । १ । व्रीहियवानां यत्र यत्र यजेत तन्मयꣳस्थालीपाक ꣳअपयेत् । २ । कामादीजानोऽन्यत्रापि व्रीहियवयोरेवान्यतर ꣳस्थालीपाकꣳ अपयेत् । ३ । न पूर्वचोदित-

त्वात् सन्देहः । ४ । असम्भवाद्विनिवृत्तिः । ५ । क्षेत्रस्यपुरस्तादुत्तरतो वा शुचौ देशे कृष्टे फलानुपरोधेन । ६ । ग्रामे वोभयसम्प्रयोगादविरोधात् । ७ । यत्र स्रपयिष्यन्नुपलिप्त उद्धृतावोक्षितेऽग्निमुपसमाधाय तन्मिश्रैर्दर्भैः स्तीर्त्वाऽऽज्यभागा विष्णाऽऽज्याहुतीर्जुहोति । ८ । पृथिवी द्यौः प्रदिशो दिशो यस्मै द्युभिरावृताः । तमिहेन्द्र मुपह्वये शिवानः सन्तु हेतयः स्वाहा ॥ यन्मेकिञ्चिदुपेप्सितमस्मिन् कर्मणि वृत्रहन् । तन्मे सर्वं ꣳ समृध्यतां जीवतः शरदः शतꣳ स्वाहा । सम्पत्तिर्भूतिर्भूमिर्वृष्टि र्ज्यैष्ठ्य ꣳश्रैष्ठ्य ꣳ श्रीः प्रजामिहावतु स्वाहा । यस्या ऽभावे वैदिक लौकिकानां भूतिर्भवति कर्मणाम् । इन्द्र पत्नीमुपह्वये सीताꣳ सा मे त्वनपायिनी भूयात् कर्मणि कर्मणि स्वाहा । अश्वावतीगोमती सूनृतावती बिभर्ति या प्राणभृतो अतन्द्रिता । खलामालिनी मुर्वरामस्मिन् कर्मण्युपह्वये ध्रुवा ꣳसा मे त्वनपायिनी भूयात् स्वाहेति । ९ । स्थालीपाकस्य जुहोति सीतायै जयायै शमायै भूत्या इति । १० । मन्त्रवत् प्रदानमेकेषाम् ।११।

स्वाहाकारप्रदाना इति श्रुतेर्विनिवृत्तिः । १२ । स्तरणशेष कुशेषु सीतागोप्तृभ्योबलिꣳ हरति पुरस्ताद् ये त आसते सुधन्वानो निषङ्गिणः । ते त्वा पुरस्ताद् गोपायन्त्वप्रमत्ता अनपायिनो नम एषां करोम्यहं बलिमेभ्यो हरामीममिति । १३ । अथ दक्षिणशेऽनिमिषा वर्मिण आसते तेत्वा दक्षिणतो गोपायन्त्वप्रमत्ता अनपायिनो नम एषां करोम्यहं बलिमेभ्यो हरामीममिति । १४ । अथ पश्चात् आभुवः प्रभुवो भूतिर्भूमिः पार्ष्णिः शुनङ् कुरिः । ते त्वा पश्चाद् गोपायन्त्वप्रमत्ता अनपायिनो नम एषांकरोम्यहं बलिमेभ्यो हरामीममिति।१५। अथोत्तरतो भीमा वायुसमा जवे ते त्वोत्तरतः क्षेत्रे खले गृहेऽध्वनि गोपायन्त्वप्रमत्ता अनपायिनो नम एषां करोम्यहं बलिमेभ्यो हरामीममिति । १६ । प्रकृतादन्यस्मादाज्यशेषेण च पूर्ववद्बलिकर्म । १७ । स्त्रियश्चोपयजेरन्ब्राह्मचारिणत्वात् ।१८। सꣳस्थिते कर्मणि ब्राह्मणान् भोजयेत् ब्राह्मणान् भोजयेत् । १९ ॥१७॥ इतिद्वितीयकाण्डम् समाप्तम् ॥

कण्डिका १५

अब सीता यज्ञ है । १ । धान या जव जिस का करे उसी का (स्थालीपाक) बटलोई में भात बनावे । २ । भले ही चाहे अन्य यागों में भी जौ या धान किसी एक का भात बनावे । ३ । पहिले कहीं कहा नहीं इस लिये सन्देह है । ४ । अनम्भव होने से सन्देह नहीं । ५ । खेत के पूर्व या उत्तर भाग में जहां शुद्ध हल से जुते हुये खेत को हानि न हो । ६ । या ग्राम के खेड़े पर जहां खेत और ग्राम मिले हुये हैं वहां करे कोई विरोध न होने से । ७ । जहां भात पकाना है वहां गोबर मट्टी से लीपकर कुँची वेदी बना जल से छिड़के अग्नि स्थापन कर धान पाक में धान के तुषों वा पयाल, पाक जौ का हो तो जौ के पयाल कुशा वेदी के सब ओर बिछावे। आज्यभागाहुति आज्याहुति देता है ८। पृथिवी द्यौ० इत्यादि ५ मन्त्र जो मूल कण्डिका में ऊपर हैं इनसे ५ घृत की आहुतिदे । ९। स्थालीपाक की आहुति आगे लिखे अनुसार दे । सीतायै स्वाहा, प्रजायै स्वाहा, धनायै स्वाहा, भूत्यै स्वाहा, । १०। कोई आचार्य कहते हैं स्वाहा भी न लगावे । ११ । स्वाहा शब्द से आहुति होती है यह श्रुति है इसलिये सूत्र१० की निवृत्ति है । १२ । अग्नि के पास बिछी कुशों पर सीता रक्षकों को बलि देते हैं। "पुरस्तात०" इस मन्त्रसे पूर्व दिशामें । १३ । फिरदक्षिण में "निमिषावर्य०" इस मन्त्रसे । १४ । फिरपश्चिम में "आभुव प्रभुवो०"। १५। फिर उत्तर में "भीमावायुसमा०" इस मन्त्रसे । १६ । प्रकृत=धान या जौ छोड़ अन्य दुर्गंधित मिष्ट और घृत से पूर्ववत्=बलिकर्म करे ।१७। स्त्रियां भी बलिकर्म यज्ञकरैं ऐसा आचारहै । १८। कर्म समाप्तिपर ब्राह्मणों को भोजन करावे । ब्राह्मणों को भोजन करावे ।१९। दोवार उच्चारण ग्रन्थ की समाप्तिका चिन्ह है ।

तीसरा काण्ड कण्डिका १

अमाहिताग्नेर्नवप्राशनम् । १ । नव स्थालीपाक अपयित्वाऽऽज्यभागावित्वाऽऽज्याहुती जुहोति 'शतायुधाय शतवीर्याय शतोतये अभिमातिषाहे । शतं यो नः शरदोऽजीजानिन्द्रो नेषदति दुरितानि विश्वा स्वाहा । ये चत्वारः पथयो देवयाना अन्तरा द्यावापृथिवी वियन्ति । तेषां येऽज्यानिमजीतिमावहात् तस्मै नो देवाः परिधत्तेह सर्वे स्वाहा, इति । २ । स्थालीपाकस्याग्रयणदेवताभ्यो हुत्वा जुहोति स्विष्टकृतेच 'स्विष्टमग्ने अभि तत् पृणीहि विश्वांश्च देवः पृतना अभिष्यक् । सुगन्नु पन्थां प्रदिशन्न एहि ज्योतिष्मद्धेह्यजरं न आयुः स्वाहा, इति । ३ । अथ प्राश्नाति–' अग्निः प्रथमः प्राश्नातु सविता वेद यथा हविः । शिवा अस्मभ्यमोषधीः कृणोतु विश्वचर्षणिः । भद्रान्नः श्रेयः समनैषु देवास्त्वयाऽवसेन समशीमहित्वा । स नो मयोभूः पितवाविशस्व शं तोकाय तनुवे स्योनः, इति । ४ । अन्नवतीर्या वा ।५। अथ यावाना मेलसुत्यं मधुना संयुतं यवं सरस्वत्या अधिवनाय चर्कृषुः । इन्द्र आसीत् सीरपतिः शतक्रतुः कीनाशा आसन् मरुतः सुदानवः, इति । ६ । तेषो ब्राह्मण भोजनम् । ७ ॥१॥

कण्डिका २ (आग्रहायणीकर्म)

मार्गशीर्ष्यां पौर्णमास्यामाग्रहायणीकर्म । १ । स्थालीपाकꣳ श्रपयित्वा श्रवणावदाज्याहुती हुत्वाऽपरा जुहोति–यां जना प्रतिनन्दन्ति रात्रीं धेनुमिवायतीम् । संवत्सरस्य या पत्नी सा नो अस्तु सुमङ्गली स्वाहा । संवत्सरस्य प्रतिमा यद्या रात्रिभुरास्महे । प्रजा सुवीर्यं कृत्वा दीर्घमायुर्यजामहे स्वाहा । संवत्सराय परिवत्सरायेदावत्सरायेद्वत्सराय वत्स-

राय कृणुता [illegible]मः। तेषां वय ँ सुमतौ यज्ञियानां व्योगजीता अहतास्याम स्वाहा। ग्रीष्मो हेमन्त उतनो वसन्तः शिवा वर्षा अभया शरन्नः। तेषामृतूनांश्च शत शारदानां निवास एषाम अभये वसेम स्वाहेति। २। स्थालीपाकस्य जुहोति सोमाय मृगशिरस्ते, मार्गशीर्ष्यै पौर्णमास्यै हेमन्ताय चेति। ३। प्राशनान्ते कुरुष्णेष ँ शूर्पेन्युप्योपनिष्क्रमणप्रभृत्यामार्जनात्॥ मार्जनान्त उत्सृष्टो बलिरित्याह। ५। पश्चादग्ने स्वस्तरणास्तीर्याहतं च वास आप्लुता अहतवाससः प्रत्यवरोहन्ति दक्षिणतः स्वामी जायोत्तरा यथाकनिष्ठमुत्तरतः। ६। दक्षिणतो ब्रह्माणमुपवेश्योत्तरत उदपात्र ँ शमीशाखार्वीतालोष्ठा श्मनो निधायाग्निमीक्षमाणो जपति—अयमग्निर्वीरतमोऽयं भगवत्तमः सहस्रसातमः। सुवीर्यायाऽया ँ श्रैष्ठ्यं दधातु नौ, इति। ७। पश्चादग्नेः प्राञ्जलिं करोति। ८। दैवीं नावमिति तिसृभिः स्वस्तरमारोहन्ति। ९। ब्रह्माणमामन्त्रयते ब्रह्मन् प्रत्यवरोहाम, इति। १०। ब्रह्मानुज्ञाताः प्रत्यवरोहन्ति 'आयुःकीर्तिर्यशो बलमन्नाद्यं प्रजाम्, इति। ११। उपेता जपन्ति सुहेमन्तः सुवसन्तःसुग्रीष्मः प्रतिधीयतां नः शिवा नो वर्षा सन्तु शरदः सन्तुः नः शिवाः, इति। १२। स्योना पृथिवीनो भव इति दक्षिणपार्श्वेः प्राक् शिरस्तः संविशन्ति। १३। उपोत्तिष्ठन्ति 'उदायुषा स्वायुषोत्यजस्र य कृधा पृथिव्याः सहधामभिः, इति। १४। एवं द्विरपरं ब्रह्मानुज्ञाताः। १५। अधः शयीर ँ श्चतुरो मासान् यद्येवं वा। १६॥ २॥

कण्डिका ३ (अष्टका कर्म)

[illegible]ष्टकाहाययायास्तिस्रोऽष्टकाः॥ १॥ ऐन्द्री त्रैष्टुभी जागतीत्याग्नेयीत्यपिकर्षेति॥ २॥ अपूपमा ँ सशाकैर्यावसंख्यम्॥ ३॥ प्रथमाष्टका पञ्चाष्टस्याम्॥४॥ स्थालीपाक ँ श्रपयित्वाऽऽज्यम-

Acc. No.

भागावित्राऽऽज्याहुतीर्जुहोति त्रिँ शतत्वसारुपयन्तिनिष्कृ-
ति ँ समानं केतुंप्रतिमुञ्चमानाः। ऋतूँ स्तन्वते ऋवयः प्रजा-
नतीर्विश्वेदेवन्दक्षः परियन्ति भास्वतीः स्वाहा ॥ ज्योतिष्मतीं
प्रतिमुञ्चतेनभोरात्री देवी सूर्यस्य व्रतानि । विपश्यन्ति पशवो
जायमाना नानारूपा मातुरस्या उपस्थे स्वाहा ॥ एकाष्टका
तपसा तप्यमाना जजानगर्भं महिमानमिन्द्रम् । तेन द्रप्यून्
व्यसहन्त देवा इन्द्राऽसुराणामभवच्छचीभिः स्वाहा ॥ अना-
नुजा ननुजां मामकर्त सत्यंवदन्त्यन्विच्छतत् । भूयाममस्य
सुमतौ यथायूयमन्यां वो अन्यामति मा प्रयुक्त स्वाहा ॥
अभून्मम सुमतौ विश्ववेदा आदित्यानविदद्वि गाधम् ॥
भूयासमस्य सुमतौ यथायूयमन्या वो अन्यामतिमा प्रयुक्त
स्वाहा ॥ पञ्चव्यृष्टीरनुपञ्चदोहा गां पञ्चनाम्नी मवसोऽनुपश्य ँ
पञ्चदिशः पञ्चदेवक्षुमाः समानमूर्ध्नीरधिलोकमेक ँ स्वाहा ॥
ऋतस्य गर्भः प्रथमा व्यृदिव्यामेका महिमानं बिभर्ति ॥
सूर्यस्येका चरति निष्कृतेषु धर्मण्येका सवितैकानियच्छतु
स्वाहा ॥ या प्रथमा व्यौच्छत् साधेन्द्रमवद्यमे ॥ सानः पय-
स्वती दुहामुत्तरामुत्तरा ँ समा ँ स्वाहा ॥ शुक्रऋषभानभसा
ज्योतियाऽगाद् विश्वरूपा शबलीः अग्निकेतुः । समानमर्थ ँ
स्वपश्यमाना विभ्रती जरामजरं उप आगाः स्वाहा । ऋतूनां
पत्नी प्रथमेयवागादन्हां नेत्री जनित्री प्रजानाम् । एका सती
बहुधोषोव्युच्छस्यजीर्णा त्वं जरयसि सर्वमन्यत् स्वाहेति ।
॥ स्थालीपाकस्य जुहोति 'शान्ता पृथिवी शिवमन्तरिक्ष ँ
शग्नो द्यौरभयं कृणोतु । शग्नो दिशः प्रदिश आदिशो नोऽहो
रात्रे कृणुतं दीर्घमायुर्यज्ञवैस्वाहा । आपो मरीचीः परिपान्तु
सर्वतो धाता समुद्रो अपहन्तु पाप्मा । भूतं भविष्यदमृतद् वि-
श्वमस्तुमे ब्रह्माभिगुप्तः सुरक्षितः स्या ँ स्वाहा । विश्वेआदित्या

वसवश्च देवा रुद्रा गोप्तारो मरुतश्चसन्तु । ऊर्जंप्रजाममृतं-दीर्घमायुः प्रजापतिर्मेपि परमेष्ठी दधातु नः स्वाहेति । ६ । अष्टकायै स्वाहेति ।७। मध्यमा गवा ।८। तस्यै वपां जुहोति 'वह्नं वपां जातवेदः पितृभ्यः, इति । ९ । श्वोऽन्वष्टकासु सर्वासां पार्श्वसक्थिसक्थ्याभ्यां परिवृते पिण्डपितृयज्ञवत् ।१०। स्त्रीभ्यश्चोपसेचनं चकर्षुं स्रुचा तर्पणेन चाङ्गुनानुलेपन स्रजश्च । ११ । आचार्यायान्तेवासिभ्यश्चानपत्येभ्य इच्छन् । १२ । मादया वर्षे च तुरीया शाकाष्टका । १३ ॥३॥

* कण्डिका ४ (शालाकर्म)

अथातः शालाकर्म । १ । पुण्याहे शालां कारयेत् ।२। तस्या अवटमभिजुहोति 'अच्युताय भौमाय स्वाहा' इति ।३। स्तम्भमुच्छ्रयति 'इमामुच्छ्रयामि भुवनस्य नाभिं वसोर्धारां प्रतरणीं वसूनाम् । इहैव ध्रुवा निमिनोमि शालां क्षेमे तिष्ठतु घृतमुक्षमाणा । अश्वावती गोमती सूनृतावत्युच्छ्रयस्व महते सौभगाय आत्वा शिशुराक्रन्दत्वा गावो धेनवो वाश्यमानाः। आत्वा कुमार स्तरुण आवत्सो जगदैः सह । आत्वा परिस्रुतः कुम्भ आदधनः कलशैरुप । क्षेमस्य पत्नी बृहती सुशामा रयिं नो धेहि सुभगे सुवीर्यम् । अश्वावद् गोमदूर्जस्वत् पर्णा वनस्पतेरिव । अभिनः पूर्यता ७ रयिरिदमनुक्षेयो वसान इति

* इस कण्डिका के पाठ संस्कारविधि में भी कुछेक हैं ॥

चतुरः प्रपद्यते । ४ । अभ्यन्तरतोऽग्निमुपसमाधाय दक्षिणतो ब्रह्माणमुपवेश्योत्तरतो उदपात्रं प्रतिष्ठाप्य स्थालीपाकं श्रपयित्वा निष्क्रम्य द्वारसमीपे स्थित्वा ब्रह्माणमामन्त्रयते 'ब्रह्मन् प्रविशामि, इति ।५। ब्रह्मणानुज्ञाताः प्रविशति 'ऋचं प्रपद्ये शिवं प्रपद्ये, इति ।६। आज्यं संस्कृत्य ' इहरतिः, इत्याज्याहुती हुत्वाऽपरा जुहोति–' वास्तोष्पते प्रतिजानीह्यस्मान् स्वावेशो अनमीवो भवानः। यत्त्वेमहे प्रतितन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे स्वाहा । वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिन्दो । अजरासस्ते सख्ये स्याम पितेव पुत्रान् प्रति तन्नो जुषस्व (शंनो भव द्विपदेशं चतुष्पदे स्वाहा) वास्तोष्पते शग्मया स सं सदा ते सक्षीमहिरण्मया गातुमत्यपाहि क्षेम उत योगे वरं नो यूयं पात स्वस्तिभिः सदानः स्वाहा । अमीवहा वास्तोष्पते विश्वारूपाण्याविशन् । सखा सुशेव एधि नः स्वाहा, इति ।७। स्थालीपाकस्य जुहोति ' अग्निमिन्द्रं बृहस्पतिं

विश्वान् देवानुपवहये। सरस्वतीं च वाजीं च वास्तु मे दत्त वाजिनः स्वाहा। सर्पदेवजनान् सर्वान् हिमवन्तꣳ सुदर्शनम्। वसूंश्च रुद्रानादित्यानीशानं जगद्भिः सह। एतान् सर्वान् प्रपद्येऽहं वास्तु मे दत्त वाजिनः स्वाहा। पूर्वान्ह मपरान्हंचोभौमध्यंदिना सह। प्रदोषमर्द्धरात्रिं च व्युष्टां देवीं महापथाम्, एतान् सर्वान् प्रपद्येऽहं वास्तु मे दत्तवाजिनःस्वाहा। कर्तारं च विकर्त्तारं विश्वकर्माणमोषधीश्च वनस्पतीन्। एतान् सर्वान् प्रपद्येऽहं वास्तु मे दत्त वाजिनः स्वाहा। धातारं च विधातारं निधीनां च पतिꣳ सह। एतान् सर्वान् प्रपद्येऽहं वास्तु मे दत्त वाजिनः स्वाहा। स्योनꣳ शिवमिदं वास्तु दत्तं ब्रह्मप्रजापती। सर्वाश्च देवताः स्वाहा, इति। ८। प्राशनान्ते काꣳस्येसम्भारानोप्योदुम्बर पलाशानि ससुराणि शाद्वलं गोमयं दधि मधु घृतं कुशान् यवांश्चासनोपस्थानेषु प्रोक्षेत्। ९। पूर्वं सन्धावभिमृशति—अग्निश्च त्वा यशश्च पूर्वसन्धौ गोपायेताम्, इति। १०। दक्षिणे सन्धावभिमृशति 'यज्ञश्च त्वा दक्षिणा च दक्षिणे सन्धौ

गोपायेताम् , इति । ११ । पश्चिमे सन्धावभिमृशति ' अन्नं च त्वा ब्राह्मणश्च पश्चिमे सन्धौ गोपायेताम्, इति । १२ । उत्तरे सन्धावभिमृशति 'ऊर्क् च त्वा सूनृता चोत्तरे सन्धौ गोपायेताम्, इति । १३ । निष्क्रम्य दिश उपतिष्ठते 'केता च मा सुकेता च पुरस्ताद् गोपायेतामित्यग्निर्वैकेताऽऽदित्यः सुकेता तौ प्रपद्ये ताभ्यां नमोऽस्तु तौ मा पुरस्ताद् गोपायेतामिति ।१४। अथ दक्षिणतो गोपायमानं च मा (रक्षमाणा) चदक्षिणतोगोपायेतामिति*अहर्वैगोपायमानꣳ रात्री रक्षमाणा ते प्रपद्ये ताभ्यां नमोऽस्तु ते मा दक्षिणतो गोपायेतामिति । १५ । अथ पश्चाद् दीदिविश्च मा जागृविश्च पश्चाद् गोपायेतामित्यक्षं वैदीदिविःप्राणो जागृविस्तौ प्रपद्ये ताभ्यां नमोऽस्तु तौ मा पश्चाद् गोपायेतामिति ।१६। अथोत्तरतोऽस्वप्नश्च माऽनवद्राणश्चोत्तरतो गोपायेतामिति चन्द्रमा वा अस्वप्नो व्यहर्वैगोपायमानꣳरात्रीरक्षमाणाते प्रपद्ये ताभ्यां नमोऽस्तुते मादक्षिणतो गोपायेतांवायुरनवद्राणस्तो प्रप-

ऋताभ्यां नमोस्तु सोमोत्तरतो गोपायेतामिति ।१७। निष्क्रान्तं प्रपद्यते धर्मस्थूणा राजश्रोस्तूप महोरात्रे द्वारफलके, इन्द्रस्य गृहा वसुमन्तो वरूथिनस्तानहं प्रपद्ये सह प्रजया पशुभिः सह यन्मे किञ्चिदस्त्युपजूनः सर्वं गणः सखाय साधु संवृतः तां त्वाशालेऽरिष्टवीरा गृहानः सन्तुसर्वतः' इति ।१८। ततो ब्राह्मणभोजनम् ॥ १९ ॥

कण्डिका ५ (मणिकाबधान)

अथातो मणिकाबधानम् । १ । उत्तरपूर्वस्यां दिशिवूप वदवटं खात्वा कुशानास्तीर्यौक्षतानरिष्टकांश्चान्यानि चाभिमङ्गलानिच तस्मिन् निधोति मणिकं 'सनुद्रोऽसि' इति ।२। अप आक्षिञ्चति—'आपो रेवतीः क्षयथाहि वस्वः क्रतुंच भद्रं विभृथामृतंचरायश्चस्थस्य पत्यस्य पत्नी सरस्वती तद्द गृणते वयोधाद्' इति । ३ । आपोहिष्ठेति च तिसृभिः । ४ । ततो ब्राह्मणभोजनम् । ५ । ॥ ५ ॥

६ कण्डिका

अथातः शीर्षरोगभेषजम् ।१। पाणी प्रक्षाल्य भ्रुवौ विमार्ष्टि—'चक्षुभ्यां ँ श्रोत्राभ्यांगोदानाच्छ्लुबुकादधि । यक्ष्मं ँ शीर्षण्यं ँ ललाटाद् विसृजामीममम् ' इति । २ । अर्द्धवेद् 'अवमेक विरूपाक्ष श्वेतपक्षो महायशाः । अथा चित्रपक्ष शिरो माऽस्याभिनाशीः' इति । ३ । क्षेम्यो क्षेव भवति । ४ ।

७ कण्डिका

उतूलपरिमेहः ।१। जोस्वपतोवविपाके स्वमूत्रमासिच्या-

पवलविन्निः परिविञ्चन् परीयात् 'परित्वा गिरेरहं परि मातुः परि स्वसुः' । परिवित्रोश्च आत्रोश्च स्वस्रेभ्यो विस्रजाम्यहम् । उतूल परिमोढोऽसि परिमोढःक्रमिष्यसि इति ।२। च यदि क्षाम्याद् दावाग्निसुपसमाधाय घृताक्तानि कुशेष्वानि जुहुयात् 'परित्वा हूलनो हूल निर्ऋतेस्त्र वीरुधः इन्द्रपाशेनवित्वा मह्यं सुक्षाऽथान्यमानयेदिति' ।३। स्वेभ्यो क्षेष भवति ॥ ४ ॥ ॥ ७ ॥

(कण्डिका ८)

शूलगवः ।१। स्वर्ग्यः पशव्यः पुत्र्यो धन्यो यशस्य आयुष्यः । २ । औपासनमरण्य ँ हृत्वा वितान ँ साधयित्वा रौद्रं पशुमालभेत । ३ । सायङम् । ४ । गौर्वाशब्दात् । ५ । वपा ँ श्रपयित्वा स्थालीपाकमवदानानि च रुद्राय वपामन्तरिक्षाय स्थालीपाकमिश्रायवदानानि जुहोति 'अग्नये रुद्राय शर्वाय पशुपतय उग्रायाशनये भवाय महादेवायेशानायेति च । ६ । वनस्पतिः । ७ । स्विष्टकृदन्ते ।८। दिग्व्याघारणम् । ९ । व्याघारणान्तेपत्नीःसंयाजयन्तीन्द्राग्नये रुद्राग्नये शर्वाग्नये भवान्या अग्निंगृहपतिमिति।१०। लोहितंपलाशेषुकूर्चेषु रुद्राय सेनाभ्यो बलिं हरति 'यास्ते रुद्र पुरस्तात् सेनास्ताभ्य एष बलिस्ताभ्यस्ते नमः । यास्ते रुद्र दक्षिणतःसेनास्ताभ्य एष बलिस्ताभ्यस्ते नमः । यास्ते रुद्र पश्चात् सेनास्ताभ्य एष बलिस्ताभ्यस्ते नमः । यास्ते रुद्रोत्तरतः सेनास्ताभ्य एष बलिस्ताभ्यस्ते नमः । यास्ते रुद्रोपरिष्टात् ते नास्ताभ्य एष बलिस्ताभ्यस्ते नमः । यास्ते रुद्राधस्तात् सेनास्ताभ्य एष बलिस्ताभ्यस्ते नमः ' इति । ११ । कृष्णं लोहितलिप्तमग्नौ प्रास्यत्यधोवा निखनन्ति । ११ । अनुवातं पशुमवस्थाप्य रुद्रैरुपतिष्ठते प्रथमोत्तमाभ्यां वानुवाकाभ्याम् । १३। नैतस्य पशो-

ग्रामं हरति । १४ । एतेनैव गोयज्ञो व्याख्यातः । १५ । पायसेनानर्थलुप्तः ।१६। तस्य तुल्यवया गौर्दक्षिणा ॥ १७ ॥८॥

कण्डिका ९

अथ वृषोत्सर्गः । १। गोयज्ञेन व्याख्यातः । २ । कार्तिक्यां पौर्णमास्यां रेवत्यां वाऽऽश्वयुजस्य । ३ । मध्ये गवां युवभिमुखमग्निं कृत्वाऽऽज्यं संस्कृत्य 'इन्द्रवतिः, इति षड् जुहोति प्रतिमन्त्रम् ।४ । पूषा गा अन्वेतु नः पूषा रक्षतुसर्वतः पूषा वाजं सनोतु नः स्वाहा, इति पौष्णस्य जुहोति । ५। रुद्रान् जपित्वैकवर्णं द्विवर्णं वा येा वा यूथं छादयति यं वा यूथं छादयेद् रोहितो वैव स्यात् सर्वाङ्गै रुपेतो जीववत्सायाः पयस्विन्याः पुत्रो यूथे च रूपवत्तमः स्यात् समलंकृत्य यूथे मुख्याश्चतस्रोवत्सतर्यस्ताश्चालंकृत्य "एतं युवानं पतिं वो ददामि तेन क्रीडन्तीश्चरथा प्रियेण । मानः स्राम जनुषा सुभगा रायस्पोषेण समिषा मदेम" इत्येतयैवोत्सृजेरन् । ६ । नाऽन्यस्य मभिमन्त्रयते 'मयोभूः, इत्यनुवाकशेषेण । ७। सर्वासां पयसि पायसं श्रपयित्वा ब्राह्मणान् भोजयेत् । ८ । पशुमध्येके कुर्वन्ति । ९। तस्य शूलगवेन कल्पोऽख्यातः। १० ॥

कण्डिका १०

अथोदककर्म ।१। ऊर्द्धिवर्षे प्रेते मातापित्रोराशौचम् ॥२॥ शौचमेवेतरेषाम् । ३ । एकरात्रं त्रिरात्रंवा । ४ । शरीरमदग्ध्वा निखनन्ति । ५। अन्तः सूतके चेदुत्थानादाशौचं सूतकवत् । ६ । नात्रोदककर्म । ७ । द्विवर्षप्रभृति प्रेतमाश्मशानात् सर्वेऽनुगच्छेयुः । ८ । यमगाथां गायन्तो यमसूक्तं च जपन्त इत्येके । ९ यद्युपेतो भूमिशोधनादिसमानमाहिताग्नेरौदकान्तस्य गमनात् । १०। शालाग्निनादहन्त्येनमाहिताग्निश्चेत् । ११ । मूर्ध्नीं ग्रामाग्निनेतरम् । १२ । संयुक्तं मैथुनं बोदकं याचेरन्

'उदकं करिष्यामहे' इति ।१३। 'कुरुध्वं सा चैवं पुनः इत्य-
शतवर्षे प्रेते । १४ । 'कुरुध्वम्' इत्येवेतरस्मिन् । १५ । सर्वे
ज्ञातयोऽपोभ्यवयन्त्यासप्तमात्पुरुषाद् दशमाद्वा । १६ । त-
मामग्रामक्षेत्रे यावत्सम्भ्रमन्तुस्मरेयुः ।१७ । एकवस्त्राः प्रा-
चीनावीतिनः । १८ । सव्यस्यानामिकयापनीय 'अपनःशो-
शुचदघम्' इति । १९ । दक्षिणामुखा निमज्जन्ति । २० । प्रेता
योदकं सकृत प्रसिञ्चन्त्यञ्जलिना 'अक्षावेतत्ते उदकम्' इति
। २१ । उत्तीर्णाश्चुचीदेशे शाद्वलवत्युपविष्टांस्त्रैतानपव-
देयुः । २२ । अनवेक्षमाणा ग्राममायान्ति रीतिभूताः कनि-
ष्ठपूर्वाः । २३ । निवेशनद्वारे पिचुमन्दपत्राणि विदश्याचम्यो
दकमग्निं, गोमयं, गौरसर्षपांस्तिलमाषलवणमश्मानमाक्रम्य प्र-
विशन्ति । २४ । त्रिरात्रं ब्रह्मचारिणोऽधः शायिनो न किञ्चन
कर्म कुर्युर्नप्रकुर्वीरन् ।२५ । क्रीत्वा लब्ध्वा वा दिवैवाग्नौ हो-
तुरग्नि सम् । २६ । प्रेताय पिण्डं दत्त्वावनेजनदानप्रत्यव-
नेजनेषु नाम गृह्णन् ।२७। मृतमये वा रात्रौ क्षीरोदके वि-
हायसि निदध्युः 'प्रेतात्र एत्याहि' इति । २८ । त्रिरात्र
शावमाशौचम् । २९ । दशरात्रमित्येके । ३० । न स्वाध्यायम-
धीयीरन् । ३१ । नित्यानि निवर्तेरन् वैतानवर्जम् । ३२ । शा-
लाग्नौ चैके । ३३ । अन्य एतानि कुर्युः । ३४ । प्रेतस्पर्शिनो
ग्रामं न प्रविशेयुरानक्षत्रदर्शनात् । ३५ । रात्रौ चेदादित्यस्य
। ३६ । प्रवेशनादिवमानमितरैः । ३७ । पक्षं द्वौ वाऽऽशौचम् ।
३८ । आचार्ये त्रिरात्रम् । ३९ । मातामहयोश्च । ४० । क्षीणा
वाप्रत्तानाम् । ४१ । प्रत्तानामितरे कुर्वीरन् । ४२ । साध्व ते-
षाम् ४३ प्रोषितश्चेत् प्रेयाक्ष्वणप्रभृति तदुदकः कालशेष
मासीरन् । ४४ । अतीतश्चेदेकरात्रं त्रिरात्रं वा । ४५ । अथ-

कामोदकान्यृत्विक्पत्नीश्वशुर श्वश्रूस्वसृन्मातुलभागिनेयानाम् । ४६ । ब्रह्मणांश्च । ४७ । एकादश्यामयुग्मान् ब्राह्मणान् भोजयित्वा मां श्वत् । ४८ । प्रेतायोद्दिश्य गामप्येके ह्रस्वन्ति । ४९ । पिण्डकरणे प्रथमः पितृणां प्रेतः स्यात् पुत्रवांश्चेत् । ५० । निवर्तेत चतुर्थः । ५१ । संवत्सरं पृथगेके । ५२ । न्यायस्तु न चतुर्थः पिण्डो भवतीतिश्रुतेः ।५३ । अहरहरन्नमस्मै ब्राह्मणायोदकुम्भं च दद्यात् ।५४। पिण्डमप्येके निवपन्ति ।५५।१०

कण्डिका ११

पशुश्चेदाप्लाव्यागामग्नेयाग्नीन् परीत्य पलाशशाखां निहन्ति । १ । परिव्ययणोपाकरणनियोजनप्रोक्षणान्यावृता कुर्याद्यज्ञान्यत् । २ । परिषदये हुत्वा तूष्णीमपराः पञ्च ।३ । वपाद्धरणं चाभिधारयेद् देवताश्चादिशेत् । ४ । उपाकरणनियोजनप्रोक्षणेषु स्यालोपाके पैवम् ।५। वपां हुत्वाऽवदानान्यवद्यति । ६ । सर्वाणि त्रीणि पञ्च वा । ७ । स्यालीपाकमिश्राण्यवदानानि जुहोति । ८ । पशवश्चेद्दक्षिणा । ९ । यद्देवते तद्देवतं यजेत तस्मै च भागं कुर्यात्सं च ब्रूयाद् 'इमममुप्रापय, इति । २१ । मध्यन्तरे नावं कारयेत्सवा । ११ ॥ ११ ॥

कण्डिका १२ (अवकीर्णिप्रायश्चित्त)

अथातोऽवकीर्णिप्रायश्चित्तम् । १ । अमावास्यायां चतुष्पथे गर्दभपशुमालभेत । २ । निर्ऋतिं पाकयज्ञेन यजेत । ३ । अप्यवदानहोमः । ४ । भूमौ पशुपुरोडाशश्रपणम् । ५ । तांछिष्टं परिदधीत ।६। ऊर्ध्वबालामित्येके ।७। संवत्सरं भिक्षाचर्यं चरेत् स्वकर्म परिकीर्तयन्।८। अथापरमाज्याहुती जुहोति " कामावकीर्णोऽस्म्यवकीर्णोऽस्मि काम कामाय स्वाहा । कामाभि*दुग्धोऽस्म्यभिदुग्धोऽस्मि काम कामाय स्वाहा "

* दुग्धोरस्मि इत्यपिपाठः

इति । ९ । अथोपतिष्ठते " उग्रमाशिष्ठन्तु मरुतः सस्निम्नः सं बृहस्पतिः । सं माऽयमग्निः शिष्ठन्तु प्रजया च धनेन च" इति । १० । एतदेव प्रायश्चित्तम् । ११ ॥१२॥

(कण्डिका १३)

अथातः सभा प्रवेशनम् । १ । सभामभ्येति ' सभाश्चिरसि । वादिनोमासि स्विषिर्नोनासि तस्यै ते नमः, इति । २ । अथ प्रविशति 'सभा च मा समितिश्चोभे प्रजापतेर्दुहितरौ संविदाने । येमानविद्यादुपमा संतिष्ठेत स चेतनो भवतु शं सदे जने, इति । ३ । पर्षदमेत्य जपेत् ' अभिशूरसदागमं विराजंप्रतिवाक्यः । अस्याः पर्षद ईशानः सहसेव जुहुतरो जनः, इति । ४ । स यदिमन्वेत 'क्रुद्धोयम्' इति, तमभिमन्त्रयते ' या त एषा रराट्या तनूर्मन्योः क्रोधस्य नाशनी । तां देवा ब्रह्मचारिणो विनयन्तु सुमेधसः द्यौरहं पृथिवीचाहं तौ ते क्रोधं नयामसि गर्भमश्वतर्यवहासी, इति । ५ । अथ यदिमन्येत दुर्धीऽयमिति तमभिमन्त्रयते 'शान्ते वाचमास्य आदत्ते हृदय आदधे । यत्र यत्र निहिता वाक् तां ततस्तत आददे । यदहं ब्रवीमि तत्सत्यमधरोमतोद्यस्व, इति । ६ । एतदेव वशीकरणम् । ७॥१३॥

कण्डिका १४

अथातो रथारोहणम् । १ । युक्तेति रथं सम्प्रेष्य युक्त इति प्रोक्ते सावित्राष्टित्येत्य चक्रे अभिमृशति । २ । 'रथन्तरमसि' इति दक्षिणम् । ३ । ' बृहदसि, इत्युत्तरम् । ४ । 'वामदेव्यमसि, इति कूबरीम् । ५ । हस्तेनोपस्थमभिमृशति 'अङ्गौ न्यङ्गावभितो रथं यौ ध्वान्तं वातागमनुसञ्चरन्तौ । दूरेहेति रिन्द्रयावान् पतन्निष्टे नोऽग्नयः पथ्यः पारयन्तु, इति । ६ ।

'नमोमाणिचराय, इति दक्षिणं धुरं प्राजति । ७ । अप्राप्य देवताः प्रत्यवरोहेत् तस्मिन् ब्राह्मणान् मध्ये गां अभिक्रम्य पितृन् । ८ । न स्त्रीब्रह्मचारिणौ सारथी स्याताम् । ९ । मुहूर्तमतीयाय जपेद् 'इह रतिरिहरमध्वम्,। १०। एके मास्त्विह-रतिः इति च , । ११ । स यदि दुर्बलो रथः स्यात् समास्थाय जपेद् ' अयं वामाश्विना रथो मा दुर्गे मास्तरोषद् इति । १२। स यदि सम्प्रयात् स्तम्भमुपस्पृश्य भूमिं वा जपेद् ' एष वामश्विना रथो मा दुर्गे मा स्तरोरिषद् इति ।१३ । तस्य न काचनार्तिर्न रिष्टिर्भवति । १४ । यात्वाऽध्वानं विमुच्य रथं यवसादके दापयेद् ' एष उ ह वाहनस्यानपन्हव, इति श्रुतेः । १५ ॥ १४ ॥

कण्डिका १५

अथातो हस्त्यारोहणम् । १ । एत्य हस्तिनमभिसृजति ' हस्तियशसमसि हस्तिवर्चसमसि , इति । २ । अथारोहति ' इन्द्रस्य त्वा वज्रेणाभिषिञ्चामि स्वस्ति मा सम्पारय, इति । ३ । एतेनैवाश्वारोहणं व्याख्यातम् । ४ । उष्ट्रमारोहयन्नभिमन्त्रयते 'त्वाष्ट्रोऽसित्वष्टृ दैवत्यः स्वस्ति मा सम्पारय, इति । ५ । रासभमारोहयन्नभिमन्त्रयते 'शूद्रोऽसि शूद्रजन्माऽग्नेयो वै द्विरेताः स्वस्ति मा सम्पराय, इति ॥ ६ । पन्थानमभिमन्त्रयते ' नमोरुद्राय पथिषदे स्वस्ति मा सम्पारय, इति । ७ । चतुष्पथमभिमन्त्रयते ' नमोरुद्राय चतुष्पथसदे स्वस्ति मा सम्पारय, इति । ८ । नदीमुत्तरिष्यन्नभिमन्त्रयते ' नमोरुद्रायाप्सुषदे स्वस्ति मा सम्पारय, इति ।९। गाम्भरीरोहयन्नभिमन्त्रयते सुनावम्, इति । १० । उत्तरिष्यन्नभिमन्त्रयते ' सुनाविकम् , इति । ११ । वनमभिमन्त्रयते ' नमो रुद्राय

वनस्पते स्वस्ति मा सम्पारय, इति । १२ । गिरोऽभिमन्त्रयते 'नमो रुद्राय गिरिष्ठे स्वस्ति मा सम्पारय, इति । १३ । श्मशानमभिमन्त्रयते ' नमो रुद्राय पितृष्ठे स्वस्ति मा सम्पारय, इति ।१४। गोष्ठमभिमन्त्रयते ' नमो रुद्राय शङ्कुल्पि-ण्डष्ठे स्वस्ति मा सम्पारय. इति । १५ । यत्र वा न्यस्यापि ' नमो रुद्राय, इत्येव ब्रूयात् ' रुद्रो ह्येवैतं सर्वम् , इति श्रुतेः । १६ । खिचाऽवधूताऽभिमन्त्रयते ' खिगसि नमो वज्रोऽसि नमस्ते अस्तु मानाहि ँ सीः, इति ।१७। स्तनयित्नुमभिमन्त्रयते 'शिवा नो वर्षाः सन्तु शिवा नः सन्तु हेतयः । शिवा नस्ताः सन्तु यास्त्व ँ सुजसि दृत्रहन्, इति । १८ । शिवां वाश्यमानामभिमन्त्रयते 'शिवो नाम, इति । १९ । शकुनि-वाश्यमानमभिमन्त्रयते ' हिरण्यपर्णं शकुने देवानां प्रहितं गम । यमदूत नमस्ते अस्तु किमत्वा काङ्क्षसीत्यब्रवीद्, इति । २० । लक्षणयं वृक्षमभिमन्त्रयते 'मा त्वाऽशनिर्मा परशुर्मा वातो मा राजप्रेषितो दण्डः। अङ्कुरास्ते प्ररोहन्तु निवासेत्वा अभिवर्षतु । अस्निष्टे मूलं माहि ँ सीत् स्वस्ति ते अस्तु वन-स्पते स्वस्ति मे अस्तु वनस्पते, इति । २१ । यदि किञ्चि-च्छ्रमेत् तत्प्रतिगृह्णातु 'द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृ-ह्णातु' इति वाऽस्य न ददतः क्षीयते भूयसोऽप प्रतिगृहीता भवति । २२ । अथयद्योदनं लभेत्त तत् प्रतिगृह्य 'द्यौस्त्वा, इति तस्य द्विःप्राश्नाति ' ब्रह्मात्वाप्राश्नातु ब्रह्मात्वा प्रा-श्नातु, इति । २३ । अथ यदि मन्थं लभेत, तत्प्रतिगृह्य द्यौ-स्त्वा, इति तस्यद्विः प्राश्नाति ब्रह्मा त्वाप्राश्नातु ब्रह्मा त्वा प्राश्नातु ब्रह्मात्वा पिबतु, इति । २४ ॥ १५ ॥ *

*नोट-काशीके छपे पुस्तक में कण्डिका १५ तेही १६ भी मिलादी है । यहीं समाप्त कर दिया है। और क० १५ के २२ ही सूत्र हैं ॥

कण्डिका १६

अशातोऽपीत्याधीत्यानिराकरणं ' प्रतीकं मे विचक्षणं शिक्षा मे भद्रं मुखम् ।कर्णाभ्यां भूरि शुश्रुवे या त्व ँ हार्षी रसं मयि । ब्रह्मणः प्रतिष्ठानमसि ब्रह्मणः प्रतिष्ठानमसि ब्रह्मकोशोऽसि मेधिरसि मा मेधिरस्यनिराकरणमसि ब्रह्मकोशं मे मेधय ।वाचा त्वा पिदधामि वाचा त्वाऽपिदधामि स्वरकरणकण्ठ्यौरसदन्त्यौष्ठ्यग्रहणधारणोच्चारणशक्तिर्मयि भवतु । आप्यायन्तु मेऽङ्गानि वाक्प्राणश्चक्षुः श्रोत्रं यशोबलम् । यन्मे श्रुतमधीतं तन्मे मनसि तिष्ठतु तन्मे मनसि तिष्ठतु ।१। ॥१६॥

इति पारस्कर गृह्यसूत्रं समाप्तम् ।

परिशिष्टकण्डिका

अथातो वापीकूपतडागारामदेवतायतनपुष्करिण्याः प्रतिष्ठापनं व्याख्यास्यामः ।१। सम्रोदगयनआपूर्यमाणपक्षे पुण्याहे तिथिवारकरणे ऋक्षेण गुणान्वितेतत्र वारुणं यवमयं चरु ँ श्रपयित्वाज्यभागाविघ्नाज्याहुतिर्जुहोति " त्वक्षोऽग्नेसत्वक्षो ऽक्षरूक्षे वरुण तस्यायासि,येते शतमयाश्चांग्नउदुत्तमञ्जु ँ हिरसा वरुणस्योत्तम्भनमग्नेरनीकमिति दशर्चं ँ हुत्वा।२। स्थालीपाकस्य जुहोत्यग्नये स्वाहा सोमाय स्वाहा वरुणाय स्वाहा पशवे स्वाहोग्राय स्वाहा भीमाय स्वाहा शतक्रतवे स्वाहा व्युष्टयै स्वाहा स्वर्गाय स्वाहेति यथोक्त ँ स्विष्टकृत आज्यान्ते जलधाराणि क्षिप्त्वालंकृत्य ।३। गांवारयित्वाचार्याय वरं दत्वाकर्णवेष्टकौ वासा ँ सि धेनुर्दक्षिणा ।४। ततो ब्राह्मण भोजनम् ॥५॥ इति शम्

पारस्करभाषाभाष्य

पृ० ८ में मधुपर्क में पशुवध पर और पृ० २६ पुंसवन में कूर्म पित्त पर पृष्ठ और ३३ के नोट देखने योग्य हैं ॥

पृ० ३६ पर अन्नप्राशन में सूत्र ७ से १२ तक प्रक्षिप्त प्रतीत होते हैं । कारण वहीं लिख दिया है ॥

काण्ड ३ समस्त ही हमने बारीक टाइप से छापा है । उस में प्रक्षिप्तांश बहुत अधिक प्रतीत हुवाहै जैसा नीचे की सूचीसे पता लगेगा।

काण्ड ३

१ नव प्राशन	९ वृषोत्सर्ग
२ आग्रहायणी कर्म	१० उदक कर्म
३ अष्ट का कर्म	११ पशुकल्प
४ शाला कर्म	१२ अवकीर्णी
५ मणिकाबधान	१३ सभा प्रवेश
६ शिर रोग का इलाज	१४ रथ पर बैठना
७ वशा करण	१५ हाथी पर चढ़ना
८ शूल गव	१६ पड़ा हुवा न भूलना
	१ वाप्री कूप प्रतिष्ठा परिशिष्ट

१—प्राचीन ग्रंथों में अन्तमें पाठ दोवार पढ़ने का ४ २ से पारस्कर सूत्र में दूसरे काण्ड के अन्त में कण्डिका १७ ब्राह्मणान् भोजयेत, ब्राह्मणान् भोजयेत् ऐसे दोवार है, ऐ पूर्व काण्ड के अन्त में नहीं है इससे भी काण्ड समाप्ति न किन्तु ग्रंथ समाप्ति सीही प्रतीत होती है ॥

२—पूर्वग्रंथों में २ भाग या ४ भागछुवा करतेथे ३ भाग बहु कम होते थे ॥

३—इस समय में दोही काण्डों के कर्मकाण्ड का प्रचार हो जाय तौ बहुत लाभ है तीसरे का भाषाभाष्य छपाने से गौर की हानि होती है वृद्धि नहीं ॥

४—उस का भाषानुवाद भी हम ने इसी लिये नहीं किय कि मांस से यज्ञ या पशुवध हमारे पौराणिक पण्डित भी कलिवर्जित कहकर उसे करना धर्म नहीं मानते हैं तो कलियुगी भाषा में उस भाग का अर्थ हो क्यो करने की आवश्यकता है ॥

५—हमने मूल इस लिये छपा दिया है कि मूल बना रहे तौ नजाने कोई बात इस से भी उत्तम निकल आवे, इसी लिये उसे बारीक टाइप में छपाया है, ग्रन्थ से अगल नहीं किया है ॥

६—मंत्रों काअर्थ अधिकतर संस्कार चन्द्रिका में भी छपचुका है संक्षेप सेलिखा मंत्रार्थभी समझा नहीं जाताहै विस्तार से लिखने योग्य समय नहीं है, दूसरेसंस्करण में यत्न करूंगा कि [illegible] छांटकरसबकाअर्थवहींकरकेछपाऊं ॥